संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - १५
प्रधानसम्पादकः - राधावल्लभत्रिपाठी

जम्बुनाथविरचितः

# प्रश्नसारसमुद्रः

सम्पादकः
मञ्जरबेट्टु अनन्तपद्मनाभभट्टः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# निवेदनम्

भारतदेशस्य विविधभागेषु लब्धजन्मानः जातकादिसर्वशास्त्रप्रवर्तकाः प्रवर्धकाः महान्तः दरीदृश्यन्ते । तेभ्योऽधमर्णतामङ्गीकृत्य समर्पिताः प्रणामाः विविधभागस्थान् स्पृशन्ति । किन्तु प्रश्नशास्त्रस्य षट्पञ्चाशीकार्यासप्तत्याख्यौ प्राश्निकौ ग्रन्थौ मूलाधारत्वेन स्वीकृत्य गर्गपराशरादिभिः स्वसंहितायां निरूपितानि प्रश्नशास्त्रवचनान्याकलय्य, तत्प्रतिपादितानेव निमित्ताङ्गविद्याशकुनादिसिद्धान्तान् प्रश्नविद्यायां सञ्चार्य, ग्रहराश्यादिस्वरूप-स्वभावप्रकृतिवर्णादिधर्मै आयुर्वेदसिद्धान्तसमन्वयेन समस्तव्याधिचिन्ताविधिमूहापोहबुद्ध्या परिकल्प्य, प्रश्ने प्रवेश्य, संहिताहोराद्याधारेणायुः प्रवाससन्ततिचोरादिप्रकरणं उपसम्बृह्य, जातकनिर्दिष्टदीपखड्गोपसूतिकाचिन्तामवलम्ब्य, दृष्टपदार्थोपभुक्तान्नकान्तादिभूतफलप्रकाशकं विस्मापनप्रकरणं प्रश्ने आविष्कृत्य, महोन्नतप्रश्नशास्त्ररूपतां प्रापयामासुः केरलीयाः । तस्मात्प्रश्नशास्त्राचार्येभ्यः समर्पितोऽञ्जलिप्रणामः तानेव स्पृशेत् ।

तेष्वधमर्णताप्रकाशनं तद्ग्रन्थप्रकाशनेनैव सेत्स्यतीति धिया अन्वेषयतो मम भागधेयादेव प्रश्नसारसमुद्रो दृक्पथमवततार । शताधिकेषु केलरप्रश्नशास्त्रग्रन्थेषु सत्स्वपि बहवो ग्रन्था मलयाळलिप्या, पञ्चषा एव देवनागरीलिप्या प्रकाशतामवापुः । तत्कालप्रसिद्धविविधमत-सङ्ग्राहकत्वेनायं प्रश्नसारसमुद्रः प्रश्नमार्गादन्यूनस्तस्मात्प्राचीनो दृश्यते । विशदीकृत-विस्मापनांशेन, सुग्रीवाद्यपूर्वमतनिरूपणेन, व्याख्याव्याजं पुरस्कृत्य रहस्यकथनेन, सम्प्रदायवचन-मतान्तराद्यभिप्रायाविष्करणेन च, तस्माद्भिन्नविषयकः सङ्ग्रहयोग्यश्चेति मत्वा प्रश्नसारसमुद्रस्य सम्पादनं अकरवम् ।

बह्वशुद्धो दुस्साध्योऽयमिति मध्ये मध्ये परित्यक्तोऽप्ययमेव ग्रन्थो विविधोपायं बोधयन् स्वयं पूर्णतां प्रापयन्मामनुजग्राह इति महदिदं भागदेयं मम । गुणैकपक्षपातिभिः भवद्भिः, मयाऽज्ञानकृता दोषाः क्षन्तव्या इत्यभ्यर्थये । एवं कृतकृत्यस्य ममाद्यं कर्तव्यं, समेषां सहकारिणां कृतज्ञतानिवेदनमिति धिया प्रवृत्तोऽस्मि ।

शोधकार्येऽस्मिन् बहुधा मामनुगृहीतवद्भ्यः प्राच्यप्रतीच्यविद्याभ्यां प्रथितेभ्यो डा. एम्. डि. बालसुब्रमण्यं महोदयेभ्यः तथा प्राच्यनूतनज्योतिर्गणिते सुविख्यातेभ्यः डा. धूलिपाल अर्कसोमयाजिमहाभागेभ्यः, मम दौर्भाग्यादिदानीं दिवङ्गतेभ्यः सन्तप्तेन स्वान्तेन कार्तज्ञ्यं भावयामि ।

## T2 मातृकायाः स्वरूपम्

1) बहुषु स्थलेषु स्वबुद्ध्या संशोध्य लिखति । 2) कुत्रचिदशुद्धपदस्य संशोधनं कंसमध्ये लिखित्वा सूचयति । 3) कुत्रचित् अज्ञानकृतशोधनमपि दृष्टिपथमायाति । 4) प्रतिलिपिकारेण आरम्भे B 11012 इति ग्रन्थसंख्यालेखनात्, इयं मत्सङ्केतितायाः T मातृकायाः प्रतिलिपिरिति सिद्ध्यति । प्रतिपुटं द्वित्राण्यक्षराणि अशुद्धानि निष्कासितानि दृश्यन्ते । T मातृकागतवर्णभ्रमात् कृताशुद्धिरपि दृश्यते । अन्यत्सर्वं T मातृकायाः यथावत् प्रतिलिपिः कृता दृश्यते ।

मातृकात्रयेऽपि समानस्थले दृश्यमानाः समाना अशुद्धयः परस्परलिपिप्रतिलिपिसम्बन्धं दृढीकुर्वन्ति, यथा-

मातृकात्रयगताः समानाः अशुद्धयः

| पृष्ठसंख्या | T | T1 | T2 | शुद्धपाठः |
|---|---|---|---|---|
| A 28 | नवांशाधिपराः | नवांशाधिपराः | नवांशाधिपराः | नवांशाधिपपराः |
| श्लो. 15 पृ.3 | मेषनृपतिनेनेश | मेषनृपतिनेनेश | मेषनृपतिनेनेश | मेषे नृपतिसेनेश |
| श्लो. 41 पृ.97 | सुहृदो दर्श.... देशकस्य वा | सुहृदो दर्श..... देशकस्य वा | सुहृदो दर्श... देशकस्य वा | सुहृदो दृष्टदर्शनं देशकस्य वा |
| श्लो. 13 | °पातज° | °पातज° | °पातज° | °पादज° |

## मातृकालेखनकालः

T2 मातृकासमाप्तौ '24-12-1953तमे आङ्ग्ले दिने समाप्तिमगात्' इति लेखनेन मातृकासमाप्तिदिनं सुस्पष्टमेव भवति ।

T1 मातृकायां लिखितारम्भान्तिमदिनवचनात् मातृकालेखनकालः निर्धार्यते ।

अत्रारम्भवचने तिथिवारयोरलेखनात् कालनिर्धारणं दुष्करं तथापि ग्रन्थान्तवचनात् लेखनसमाप्तिदिनं निश्चित्य तदनुसारेण आरम्भदिनं निर्णीयते ।

ग्रन्थान्तवचनात् आनन्दसंवत्सरे ज्येष्ठशुद्धषष्ठ्यां भौमवासर इत्यस्यान्वेषणं In-

## ॥ अप्रकाशितपाण्डुलिपिग्रन्थमालायां प्रकाशिता: ग्रन्था: ॥

| कुसुमसंख्या | ग्रन्थनाम | सम्पादक: | मूल्यम् * |
|---|---|---|---|
| 1. | ठक्कुरसंग्रामसिंहविरचिता **बालशिक्षा** | भवानीशङ्करशर्मा | 190/- |
| 2. | सुकुमारकविप्रणीतं **श्रीकृष्णविलासमहाकाव्यम् (बालपाठ्यव्याख्योपेतम्)** | ई. एम्.राजन् | 220/- |
| 3. | नारायणसुधीकृत: **भाट्टनयोद्योत:** | सूर्यनारायणनागेन्द्रभट्ट: | 425/- |
| 4. | अन्नम्भट्टप्रणीतं **सिद्धाञ्जनम् (तत्त्वचिन्तामण्यालोकव्याख्योपेतम्)** | एम्. विश्वनाथशास्त्री | 240/- |
| 5. | वासुदेवत्रिपाठिप्रणीत: **प्रायश्चित्तविलोचन:** | सन्तोषकुमारपण्डा | 250/- |
| 6. | आनन्दानुभवकृत: **पदार्थतत्त्वनिर्णय:** | शुद्धानन्दपाठक: | 190/- |
| 7. | वासुदेवकविकृतं **युधिष्ठिरविजयम् (बालव्युत्पत्तिकारिणी-टीकोपेतम्)** | वाई. एस्. रमेश: | 600/- |
| 8. | वराहमिहिरकृता **बृहत्संहिता (उत्पलपरिमलव्याख्योपेता)** | के.वी. शर्मा | 675/- |
| 9. | **याज्ञिक्युपनिषत् (विज्ञानेश्वरप्रणीतविवरणसहिता)** | सूर्यनारायणनागेन्द्रभट्ट: | 280/- |
| 10. | किलिमङ्गलं नारायणनम्पूतिरिप्रणीता **प्रक्रियासर्वस्वविवृति:** | एम्. के. आण्ड्रयूस् | 165/- |
| 11. | मधुसूदन-ओझा-कृत: **व्याकरणविनोद:** | महेन्द्रकुमारशर्मा | 330/- |
| 12. | भूमभट्टप्रणीतम् **अर्जुनरावणीयम् (कैरलीटीकोपेतम्)** | विजयपालशास्त्री | 340/- |
| 13. | श्रीरामचन्द्रभट्टप्रणीतं **सभ्याभरणम् (मयूखमाला-व्याख्योपेतम्)** | राजेन्द्रप्रसादभट्ट: | 300/- |
| 14. | उमामहेश्वरविरचिता **तत्त्वचन्द्रिका** | एम्. चन्द्रशेखर: | 340/- |
| 15. | जम्बुनाथविरचित: **प्रश्नसारसमुद्र:** | एम्. अनन्तपद्मनाभभट्ट: | 260/- |
| 16. | उदयङ्करविरचिता **परिभाषाप्रदीपार्चि:** | मुरारीलालशर्मा | 160/- |
| 17. | माधवदेवकृता **तर्कभाषाव्याख्या सारमञ्जरी** | टी.डी. मुरलीधर: | 160/- |
| 18. | चन्द्रदत्तविरचितं **भगवद्भक्तिमाहात्म्यम्** | बाबूरामशर्मा | 440/- |

* संस्थाननियमानुसारं मुद्रितमूल्यस्य 40% अपकर्ष: प्रदीयते।

प्रतिकृतीनां कृते-

**Rashtriya Sanskrit Sansthan (Deemed University)**
56-57 Institutional Area, Janakpuri, New Delhi-110058
EPABX: 011-28524993 / 28521994 / 28524995, Extn.214-215
**E-mail: rskssale@yahoo.co.in , rsks@nda.vsnl.net.in**
**www.sanskrit.nic.in**